# संस्कृतवार्ता

**दिनाङ्क: 04.06.2026** **प्रात: - 06:55**

**अथ वार्ताः**

**मन्त्रिमण्डलस्य निर्णयाः**

केन्द्रीयमन्त्रिमण्डलेन विमानन-परिवहन-मार्ग-आधारभूतसंरचनाक्षेत्रेषु कतिपयाः महत्त्वपूर्णाः योजनाः अनुमोदिताः।

पश्चिम-एशियासंकटकारणेन वर्धितेषु इन्धनमूल्येषु भारतीयविमानसेवानां कृते विमान-ईन्धनस्य अर्थात् एटीएफ-मूल्यस्य स्थिरीकरणार्थं तैलविपणनसमवायेभ्य: सहस्रकोटिरूप्यकाणां -आयव्ययसहायतां प्रदातुं प्रशासनं निर्णयम् कृतवत् । सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एतेन विमाननक्षेत्रसम्बद्धा: प्रायः सप्तसप्ततिलक्ष-आजीविकाः सुरक्षिताः भविष्यन्ति। एषा सहायता-योजना षट्त्रिंशन्मासपर्यन्तं प्रवर्तिष्यते।

मन्त्रिमण्डलेन दिल्ली-निकटवर्ति -क्षेत्रे वायुप्रदूषणनियन्त्रणार्थम् अपि एकस्याः योजनायाः अनुमोदनं कृतम्। द्विवर्षीय-योजनायां प्रायः द्विलक्षं ट्रकयानानि षोडशसहस्रं बसयानानि च प्रतिष्ठापयितुं लक्ष्यं निर्धारितम्।

आर्थिकसम्बद्धया मन्त्रिमण्डलीयसमित्या ओडिशाराज्ये रामेश्वरात् पारादीपपर्यन्तं त्रिषष्ट्यधिक-शतकिलोमीटर-परिमितस्य नूतनतटीय-राजमार्गनिर्माणाय अनुमतिः प्रदत्ता।

एतदतिरिक्तं समित्या बिहारराज्ये राष्ट्रीयराजमार्गयोः एकत्रिंशत् तथा एकत्रिंशत् अधिक द्विशतस्य च इत्येतयोः खगड़िया-पूर्णिया-खण्डस्य चतुर्-पथ-परियोजनापि अनुमोदिता।

**प्रधानमन्त्री- वेनेजुएला राष्ट्रपति**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां वेनेजुएला-देशस्य राष्ट्रपतिना डेल्सी रोड्रिगेज इत्यनेन सह द्विपक्षीय-वार्ता विधास्यति। अस्याम् उच्चस्तरीय-चर्चायां भारत-वेनेजुएला-सम्बन्धानां अशेषेषु-पक्षेषु मन्थनं भविष्यति, सहैव ऊर्जासुरक्षा, व्यापार-निवेश, स्वास्थ्य-सेवा, परिवहनम्, नवीकरणीय-ऊर्जा इत्यादिषु क्षेत्रेषु भविष्ये सहयोगस्य नूतन-मार्गाणाम् अन्वेषणं च भविष्यति।
रोड्रिगेज वर्यः भारतदेशस्य पञ्चदिवसीय-यात्रायां ह्यः नवदेहलीं समागच्छत्।

**प्रधानमन्त्री- योगासन**

प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् कृत्स्ने हि विश्वे योगस्य लोकप्रियता तीव्रगत्या वर्धमाना अस्ति। एकस्मिन् माजिकान्तर्जालीय पटले एकेन सन्देशेन प्रधानमन्त्रिणा संसूचितं यत् सः अद्य 'प्रथम-वैश्विक-योगासन-प्रतियोगितायाम् आभासीय-माध्यमेन सम्मिलितो भविष्यति। प्रतियोगितेयं गुजरात-राज्यस्य अहमदाबाद-नगरे आयोज्यते।

**गृहमन्त्री- त्रिपुरा दौरा**

केन्द्रीय-गृहमन्त्री अमित शाहः अद्य सायङ्काले त्रिपुरा-राज्यस्य द्विदिवसीय-यात्रायाम् अगरतला-नगरं प्रति एष्यति । यात्रावधौ श्रीशाहः 'पुष्पवन्त पैलेस, इत्यस्य शिलान्यास-समारोहे भागं ग्रहीष्यति, लङ्कामुरा-स्थिते सीमा-सुरक्षा-बलस्य निरीक्षणं करिष्यति, सहैव राज्य-केन्द्रीय-सुरक्षाधिकारिभिः सह एकम् उच्चस्तरीय-उपवेशनं करिष्यति।
गृहमन्त्रिणः यात्रां वीक्ष्य त्रिपुरा- प्रशासनेनापि एका उच्चस्तरीया प्रशासनिक-सुरक्षा-समीक्षा-सभा आयोजिता।

**<u>मालवीयनगर-अग्निकाण्ड:</u>**

राष्ट्रीयराजधान्याम् दिल्ल्याम् मालवीयनगरक्षेत्रस्य एकस्मिन् विश्रान्तिनिलये भीषणाग्निकाण्डे एकविंशतिः जनाः मृत्युमुपगताः। अनेके च जनाः आहताः अभवन्। दक्षिणदिल्ल्यारक्षि विभागस्य उपायुक्तः अनन्तमित्तलः अवदत् यत् अग्निशमनविभागस्य अष्टभिः वाहनैः सह अग्निः नियन्त्रितः। आरक्षिणां - , अग्निशमनस्य - तथा अन्य-आपत्कालिकसेवानां संयुक्तप्रयत्नैः चत्वारिंशदधिकाः जनाः सुरक्षितरूपेण उद्धृताः चिकित्सोपचारार्थं च चिकित्सालयेषु प्रेषिताः।

प्रधानमन्त्री नरेन्द्रमोदी घटनायाः विषये गहनं दुःखं व्यक्तीकृतवान् । तेन मृतकाणां परिजनानां कृते प्रधानमन्त्रिराष्ट्रियआपत्उद्धारनिधेः द्वि लक्षरूप्यकाणि तथा आहतानां कृते पञ्चाशत् सहस्ररूप्यकाणां आर्थिकसहायतायाः घोषणा कृता।

राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी.पी. राधाकृष्णन्, गृहमन्त्री अमितशाहः तथा दिल्लीराज्यस्य मुख्यमन्त्री रेखा गुप्ता अपि अस्मिन् दुःखदे घटनाक्रमे शोकं प्रकटितवन्तः। सर्वैः नेतृभिः शोकसन्तप्तपरिजनान् प्रति गहनसंवेदना व्यक्ता, आहतानां शीघ्रस्वास्थ्यलाभाय च प्रार्थना कृता।

**।।इति वार्ता:।।**